शाकविशेषः । पिण्डारा इति हिन्दीभाषा । अस्य गुणाः । शीतलत्वम् । बल्यत्वम् । पित्तनाशित्वम् । रुचिकारित्वम् । पाके लघुत्वम् । विशेषेण विषशान्तिकरत्वञ्च । इति भावप्रकाशः ॥

पिण्डारः, पुं, (पिण्डं ऋच्छतीति । ऋ + अण् ।) क्षपणकः । गोपः । महिषीरक्षकः । द्रुमभेदः । इति मेदिनी । रे, १८५ ॥ विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥

पिण्डालुः, पुं, (पिण्डवत् स्थूल आलुः ।) कन्दगुडूची । कन्दभेदः । पेड़ालु इति हिन्दीभाषा । चुवड़ि आलु इति वङ्गभाषा । तत्पर्य्यायः । ग्रन्थिलः २ पिण्डकन्दः ३ ग्रन्थिः ४ रोमशः ५ रोमकन्दः ६ रोमालुः ७ ताम्बूलपत्रः ८ नानाकन्दः ९ पिण्डकः १० । अस्य गुणाः । मधुरत्वम् । शीतलत्वम् । मूत्रकृच्छ्रदाहशोषप्रमेहनाशित्वम् । वृष्यत्वम् । सन्तर्पणत्वम् । गुरुत्वञ्च । इति राजनिर्घण्टः ॥

पिण्डालुकं, क्ली, (पिण्डालुरिव प्रतिकृतिः । इवार्थे कन् ।) आलुविशेषः । गोल आलु इति गुड़ आलु इति चुवड़ि आलु इति च भाषा । अस्य गुणाः । कफहरत्वम् । गुरुत्वम् । वातप्रकोपकत्वञ्च । इति राजवल्लभः ॥ (यथा, सुश्रुते । १ । ४६ ।

“विदारीकन्दशतावरीविसन्मृणालशृङ्गाटककशेरुकपिण्डालुकमध्वालुकहस्त्यालुककाष्ठालुकशङ्खालुकरक्तालुकेन्दीवरोत्पलकन्दप्रभृतीनि ॥”)

पिण्डाह्वा, स्त्री, (पिण्डां कस्तूरीविशेषमाह्वयति स्पर्द्धते स्वगन्धेनेति । ह्वे + कः ।) नाड़ीहिङ्गु । इति राजनिर्घण्टः ॥

पिण्डिः, स्त्री, (पिड़ि संहतौ + इन् ।) पिण्डिका । इत्यमरटीकायां रमानाथः ॥

पिण्डिका, स्त्री, (पिण्डन्ते संहतानि भवन्ति पिण्डान्ते राशीक्रियन्ते वा अराणि यस्याम् । पिण्ड + घञ् । गौरादित्वात् ङीष् । ततः कन् । ह्रस्वश्च ।) रथनाभिः । इत्यमरः । २ । ८ । ५६ ॥ सा रथचक्रमध्ये मण्डलाकारा यस्यां सर्व्वाणि काष्ठान्यासज्यन्ते । इति रायमुकुटः ॥ (पिण्डम् । यथा, हारीते प्रथमस्थाने सप्तमेऽध्याये ।

“कांस्यपात्रे समुद्धृत्य परीक्षेत भिषग्वरः ।
मुद्गकर्म्मा स तल्लब्धा श्वेतशाल्योदनस्य वा ॥
पिण्डिका तत्र संक्षिप्ता नान्यथा भाति सा पुनः ॥”)

पिचिण्डिका । सा जानुनोऽधोमांसलप्रदेशः । इति हेमचन्द्रः ॥ पायेर डिम् इति भाषा ॥ (यथा, चरके सूत्रस्थाने ७ अध्याये ।

“पक्वाशयशिरःशूलं वातवर्च्चो निरोधनम् ।
पिण्डिकोद्वेष्टनाध्मानं पुरीषे स्याद्विधारिते ॥”)

श्वेताम्लिः । इति राजनिर्घण्टः ॥ पीठः । यथा, सूत उवाच ।

“पिण्डिकालक्षणं वक्ष्ये यथावदनुपूर्व्वशः ।
पीठोच्छ्रायं यथावच्च भागान् षोड़श कारयेत् ॥
भूमावेकः प्रविष्टः स्याच्चतुर्भिर्जगती मता ।
वृत्तो भागस्तथैकः स्यात् वृत्तपट्टस्य भागतः ॥
भागैस्त्रिभिस्तथा कण्ठं कण्ठपट्टस्तु भागतः ।
भागेन वृत्तपट्टस्तु शेषभागेन पट्टिकी ॥
प्रविष्टं भागमेकैकं जगती यावदेव तु ।
निर्गमस्तु पुरस्तस्या यावद् विशेषपट्टिका ॥
पीठिकानान्तु सर्व्वासामेतत् सामान्यलक्षणम् ।
निःशेषाद्देवताभेदात् शृणुध्वं द्विजसत्तमाः ॥
स्थण्डिला वाथ वापी च यक्षी वेदी च मण्डला ।
पूर्णचन्द्रा च वज्रा च पद्मा वार्द्धशशिस्तथा ॥
त्रिकोणा दशमी तासां संस्थानञ्च निबोधत ।
स्थण्डिला चतुरस्रा तु वर्ज्जिता मेखलादिभिः ॥
वापी द्विमेखला ज्ञेया यक्षी चैव त्रिमेखला ।
चतुरस्रायतां वेदीं न तां लिङ्गेषु योजयेत् ॥
मण्डला वर्त्तुला या तु मेखलाभिर्गणप्रिया ।
रिक्ता द्विमेखला मध्ये पूर्णचन्द्रा तु सा भवेत् ॥
मेखलात्रयसंयुक्ता षड़स्रा वज्रिका भवेत् ।
षोड़शास्रा भवेत् पद्मा किञ्चिद्ध्रस्वा च मलतः ॥
तथैव धनुराकारा सार्द्धचन्द्रा प्रशस्यते ।
त्रिशूलसदृशा तद्वत् त्रिकोणागूर्द्धतो मता ॥
प्रागुदक्प्रवणा तद्वत्प्रशस्ता लक्षणान्विता ।
परिवेषस्त्रिभागेन निर्गमस्तत्र कारयेत् ॥
विस्तारस्तत्प्रमाणस्तु मूले चाग्रे तदूर्द्धतः ।
जलवाहश्च कर्त्तव्यस्त्रिभागेन सुशोभनः ॥
लिङ्गस्यार्द्ध त्रिभागेन स्थौल्येन समधिष्ठिता ।
मेखला तु त्रिभागेन खातं वै तत्प्रमाणतः ॥
अथवा पादहीनन्तु शोभनं कारयेत् सदा ।
उत्तरस्यं प्रमाणन्तु प्रमाणादधिकं भवेत् ॥
स्थण्डिलायामथारोग्यं धनधान्यञ्च पुष्कलम् ।
गोप्रदा तु भवेत् यक्षी वेदी सम्पत्प्रदा भवेत् ॥
मण्डलायां भवेत् कीर्त्तिर्वरदा पूर्णचन्द्रिका ।
आयुःप्रदा भवेद्वज्री पद्मा सौभाग्यदायिनी ॥
पुत्त्रप्रदार्द्धचन्द्रा स्यात् त्रिकोणा शत्रुनाशिनी ।
देवस्य यजनार्थन्तु पिण्डिका दश कीर्त्तिताः ॥
शैले शैलमयीं दद्यात् पार्थिवे पार्थिवीन्तथा ।
दारवे दारवीं कुर्य्यान्मिश्रे मिश्रान्तथैव च ॥
नान्ययोनिस्तु कर्त्तव्या सदा शुभफलेप्सुभिः ॥
अर्च्चायामसमं दैर्घ्यं लिङ्गायामसमं तथा ।
यस्य देवस्य या पत्नी तां पीठे परिकल्पयेत् ॥
एवमेतत् समाख्यातं समासात् पीठलक्षणम् ॥”

इति मत्स्यपुराणे पीठिकानुकीर्त्तनं २३६ अः ॥ (लिङ्गपीठम् । गौरीपट्टः । यथा, काशीखण्डे वायुसंहितायामुत्तरखण्डे । २८ । ६ ।

“लिङ्गं पिण्डिकया सार्द्धं पञ्चगव्येन शोधयेत् ॥”)

पिण्डितं, त्रि, (पिड़ि + क्तः ।) गणितम् । घनम् । इति विश्वमेदिन्यौ ॥ (संहतः । यथा, वायुपुराणे ।

“अर्च्चिष्मान् पिण्डितशिखः सर्पिः काञ्चनसन्निभः ।
स्निग्धः प्रदक्षिणश्चैव वह्निः स्यात् कार्य्यसिद्धये ॥”)

गुणितम् । इति हेमचन्द्रः ॥ तुरुष्के, पुं । इति राजनिर्घण्टः ॥

पिण्डिलः, पुं, (पिण्डवदाकृतिरस्त्यस्येति । पिण्ड + इलच् ।) सेतुः । इति त्रिकाण्डशेषः ॥ गणकः । इत्युणादिकोषः ॥

पिण्डिला, स्त्री, (पिण्डिल + टाप् ।) गोडुम्बा । इति शब्दचन्द्रिका ॥

पिण्डी, [न्] त्रि, (पिण्डोऽस्त्यस्येति । इनिः ।) शरीरी । यथा,—

“यथा सूर्य्यं विना भूमिर्गृहं दीपविवर्ज्जितम् ।
लिङ्गहीनो यथा पिण्डी जयश्रीस्त्वां विना तथा ॥”

इति जैमिनिभारते आश्वमेधिकपर्व्वणि ६८ अध्याये ॥

पिण्डी, स्त्री, (पिण्डाकारोऽस्त्यस्या इति । अच् । ततो ङीष् ।) पिण्डीतगरः । अलावूः । खर्ज्जूरविशेषः । इति मेदिनी । डे, २० ॥ स्थाननिरूपणार्थकोपन्यासः । इति धरणिः ॥ (पिण्डि + कृदिकारादिति वा ङीष् ।) पिण्डिका । इत्यमरटीकायां रायमुकुटः ॥ पिण्डम् । यथा,—

“नीताय तुरगायाशु भक्तपिण्डीं सुगन्धिनीम् ।
दद्यात् पुरोहितस्तत्र संमन्त्र्य शान्तिमन्त्रकैः ॥”

इति कालिकापुराणे ८६ अध्यायः ॥

पिण्डीतकः, पुं, (पिण्डीं स्वल्पपिण्डं तनोतीति । तन + अन्येभ्योऽपीति डः । ततः संज्ञायां कन् ।) मदनवृक्षः । इत्यमरः ।२।४।५२॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

“मदनः श्वसनो राढो गोलः पिण्डीतकः फलम् ।
छर्द्दनो विल्वपुष्पा च हरहाटस्तु शल्यकः ॥”

यथा च ।

“पिण्डीतकस्य तु वराहविभावितस्य
मूलेषु कन्दशकलेषु च सौवहेषु ।
तैलं कृतं गतिमपोहति शीघ्रमेतत्
कन्देषु चामरवरायुधसाह्वयेषु ॥”

इति सुश्रुते चिकित्सितस्थाने सप्तदशेऽध्याये ॥)

तगरः । फणिज्झकः । इति विश्वः ॥

पिण्डीतगरः, पुं, (पिण्ड्या पुष्पावच्छेदे स्वल्पपिण्डेन उपलक्षितस्तगरः ।) तगरविशेषः । तत्पर्य्यायः । कालवर्द्धनः २ । इति त्रिकाण्डशेषः ॥

पिण्डीतगरकः, पुं, (पिण्डीतगर + स्वार्थे संज्ञायां वा कन् ।) तगरम् । इति राजनिर्घण्टः ॥

पिण्डीतरुः, पुं, (पिण्ड्या उपलक्षितस्तरुः ।) महापिण्डीतरुः । इति राजनिर्घण्टः ॥

पिण्डीपुष्पः, पुं, (पिण्डीवत् पुष्पं पुष्पस्तवको यस्य ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥ (अशोकशब्देऽस्य विशेषो ज्ञेयः ॥)

पिण्डीरः, पुं, (पिण्डीवत् पिण्डाकाराणीत्यर्थः फलानि ईरयतीति । ईर + णिच् + अण् ।) दाड़िमवृक्षः ।इति त्रिकाण्डशेषः ॥ डिण्डीरः । इत्यमरटीकायां रायमुकुटः ॥ नीरसे, त्रि । इति हारावली । १६६ ॥

पिण्डीशूरः, पुं, (पिण्ड्यां पिण्डव्यापारे भोजने एव शूरः अतिनिपुणः नान्यत्र कार्य्यादाविति भावः ।) स्वगेहमात्रे वसन् परद्वेषी । तत्पर्य्यायः । गेहेनर्दी २ गेहेशूरः ३ । इति हेमचन्द्रः ।३।९४१॥ (यथा, भट्टौ । ५ । ८५ ।

“राक्षसान् वटुयत्नेषु पिण्डीशूरानिरस्तवान् ।
मद्यशो कूपमाण्डूकि ! तवैतावति कः क्षयः ॥”)